दिनाङ्क : 01/11/2024 सायम् : 06:20

**मुख्यवार्ता:**

- केन्द्रीयगृहमन्त्री अमितशाहः अद्य अहमदाबादस्य पिराना नगरे गुजरातस्य बृहत्तमस्य अपशिष्टस्य ऊर्जायाः संयंत्रस्य उद्घाटनं विहितवान्।
- राष्ट्रपति द्रौपदी मुर्मु:, उपराष्ट्रपति जगदीप धनखड़:, प्रधानमन्त्री नरेन्द्र मोदी च अद्य आन्ध्रप्रदेश, छत्तीसगढ़ इत्यादिनां राज्यानां जनेभ्य: राज्यत्व-दिने अभिनन्दनं कृतवन्त:।
- पूर्व लद्दाख क्षेत्रे भारतीय चीन सैन्यबला: एल ए सी इति वास्तविकनियन्त्रणरेखाया: रक्षां कर्तुं सिद्धा:।
- अमेरिकादेशे राष्ट्रपतिनिर्वाचनस्य कृते डेमोक्रेटिकपार्टीति दलस्य कमला हैरिस्, रिपब्लिकनपक्षस्य डोनाल्ड ट्रम्पः च प्रचारस्य अन्तिमसप्ताहे महत्त्वपूर्णप्रान्तानां भ्रमणं आरब्धवन्तौ।
- स्लोवाकिया देशे प्रचाल्यमाणे ब्रातिसलावा टेनिस ओपन प्रतियोगितायाः भारतस्य ऋत्विक चौधरी बोलोपल्ली, अर्जुन काढे चोभौ पुरूषयुगलवर्गस्य उपान्त्यचक्रे संप्राप्तौ।

**अमितशाहः अहमदाबाद**

केन्द्रीयगृहमन्त्री अमितशाहः अद्य अहमदाबादस्य पिराना नगरे गुजरातस्य बृहत्तमस्य अपशिष्टस्य ऊर्जायाः संयंत्रस्य उद्घाटनं विहितवान्। सार्वजनिक सहयोगेन निर्मितस्य अस्य संयंत्रस्य पञ्चसप्तत्यधिकत्रिंशत्कोटिरूप्यकाणां व्ययः अभवत् । आकाशवाण्याः वार्ताहरेण प्रतिपादितं यत् एषः गुजरातस्य प्रथमः अवकर - ऊर्जासंयंत्रः भविष्यति। अस्मिन् अवसरे गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः अपि उपस्थितः आसीत् । अहमदाबादस्य पिराना-नगरे स्थापितं राज्यस्य बृहत्तमः अपशिष्ट-ऊर्जा-संयंत्रः अहमदाबाद-नगरपालिकायाः जिन्दल-समूहस्य चोभयोः संयुक्त - तत्वावधाने विनिर्मितः अस्ति। प्रायोगिकरूपेण आरब्धस्य अस्य संयंत्रस्य अद्य आधिकारिकतया उद्घाटनं जातम्। अस्मिन् संयंत्रे प्रतिदिनं प्रायः एकसहस्रमेट्रिकटनमितं अपशिष्टं संसाधितं भविष्यति, येन पञ्चदश मेगावाट्मितस्य ऊर्जा उत्पद्यते। अयं संयंत्रः न केवलं हरितं स्वच्छं च भविष्यं सुनिश्चितं करिष्यति, अपितु प्रभावि अपशिष्टप्रबन्धनस्य आदर्शः उपक्रमः अपि सिद्धः भविष्यति।

**राष्ट्रपति**

राष्ट्रपति द्रौपदी मुर्मु:, उपराष्ट्रपति जगदीप धनखड़:, प्रधानमन्त्री नरेन्द्र मोदी च अद्य आन्ध्रप्रदेश, छत्तीसगढ़, हरियाणा, कर्नाटक, केरल, मध्यप्रदेश, पंजाब, तमिलनाडु, लक्षद्वीप, पुडुचेरी राज्यानां जनेभ्य: राज्यत्व-दिने अभिनन्दनं कृतवन्त:। एकस्मिन् सामाजिक अन्तर्जालीय पटल माध्यमेन राष्ट्रपति: देशस्य विकासयात्रायां एतेषां राज्यानां केन्द्रशासितप्रदेशानां च जनानां योगदानं प्रकाशितवती। उपराष्ट्रपति: जगदीप धनखड़: कामनाम् अकरोत् यत् एतानि राज्यानि केन्द्रशासितप्रदेशा: च अविरतं प्रफुल्लिता: प्रगतिशीला: च भवेयु: सममेव देशस्य शान्तिसमृद्धौ च योगदानं दद्यु:। अत्रान्तरे एव

एकस्मिन् सामाजिक अन्तर्जालीय पटले प्रधानमन्त्री मोदी अपि राज्यानां जनेभ्य: सफलतायै मङ्गलकामना: अयच्छत्।

## भारत-चीन

पूर्व लद्दाख क्षेत्रे भारतीय चीन सैन्यबला: एल ए सी इति वास्तविकनियन्त्रणरेखाया: रक्षां कर्तुं सिद्धा:। भारतीय सैन्य-बलानुसारं विंशत्युत्तर विंशति: सहस्र तम वर्षस्य अप्रैल मासे द्वयो: सैन्यबलयो: संघर्षस्यान्तरं प्राय: सार्धचतुर्वर्षेभ्य: स्थगितस्य डेमचोक् क्षेत्रे रक्षा पुन: आरब्धा। देपसाङ्गे च शीघ्रमेव आरप्स्यते। गतमासे कूटनीतिकसैन्यस्तरस्य वार्तालापस्य श्रृङ्ख्लाया: अनन्तरं राष्ट्रद्वयं विसङ्गतिं कर्तुं सहमतौ। गतदिने दीपावली पर्वणि भारतीयचीन-सैन्यबलै: चुशुल् मोल्डो, दौलत बेग ओल्डी, हॉटस्प्रिंग, के. के. पास, कोंगक्ला इत्यादिषु विभिन्नेषु स्थानेषु मिष्ठानस्य आनादप्रदानं आचरितम्।

## अमेरिका

अमेरिकादेशे नवम्बर मासस्य पञ्च दिनाङ्के संजायमाणे राष्ट्रपतिनिर्वाचनस्य कृते डेमोक्रेटिकपार्टीति दलस्य कमला हैरिस्, रिपब्लिकनपक्षस्य डोनाल्ड ट्रम्पः च प्रचारस्य अन्तिमसप्ताहे महत्त्वपूर्णप्रान्तानां भ्रमणं आरब्धवन्तः। निर्वाचनात् प्राक् सर्वेक्षणानानुसारं प्रतिद्वन्द्वीनां मध्ये निकटस्पर्धा वर्तते। विभिन्नेषु सर्वेक्षणेषु कमला हैरिस् ट्रम्पस्य अपेक्षया किञ्चित् अग्रतां संधत्ते। वर्तमानराष्ट्रपतिः जो बाइडेन् इत्यस्य पुनः निर्वाचिनेन अस्वीकार्यतामालक्ष्य कमला हैरिस् डेमोक्रेटिकपक्षस्य प्रत्याशिनी सञ्जाता। एतस्याः कृते षड्कोटिभ्यः अधिकाः अमेरिकीयजनाः मतदानं कृतवन्तः। मतदातारः राष्ट्रपतिनिर्वाचनाय ई-मेलद्वारा अथवा व्यक्तिगतरूपेण मतदानं कृतवन्तः।

## झारखण्ड

विधानसभानिर्वाचनस्य द्वितीयचरणस्य नामाङ्कनानां प्रत्याहरणप्रक्रिया झारखण्डे प्रचलति। अवधेयास्पदं वर्तते यत् प्रत्याहरणस्य अद्य अन्तिमतिथि: वर्तते। चतुस्त्रिंशत्तोत्तर षट्शत अभ्यर्थिन: नामाङ्कनं विहितवन्त:। नामाङ्कनां प्रत्याहरणप्रक्रियानन्तरं अभ्यर्थीनां अन्तिमाङ्का: आयास्यन्ति इति अपेक्षा क्रियते। द्वितीयचरणस्य अष्टत्रिंशन्निर्वाचनक्षेत्रेषु मतदानं नवम्बर मासस्य विंशतिदिनाङ्के भविष्यति।

## मांडविया युवा पुरस्कार

केंद्रीययुवक्रीडामंत्री मनसुख मांडविया युवभ्यः त्रयोविंशत्यधिकद्विसहस्रतमवर्षस्य प्रतिष्ठितस्य राष्ट्रीययुवपुरस्कारस्य कृते आवेदनं कर्तुं आह्वानं विहितवान्। पुरस्कारोयं पञ्चदशतः ऊनविंशतिः वर्ष पर्यंतं युवभ्यः संस्थानां विकासाय सामाजिक सेवानां विभिन्न क्षेत्रेषु उत्कृष्ट योगदानाय च प्रदास्यन्ते। एतासु सेवासु स्वास्थ्यं मानवाधिकाराणां प्रचारः सक्रिय नागरिकता, सामुदायिक सेवाः च सम्मिलिताः सन्ति। अस्मिन् पुरस्कारे एक जनः एकं पदकं, प्रमाण पत्रं समेत्य एकलक्षरूप्यकाणां धनराशिं प्राप्स्यति। सममेव संगठनं त्रिलक्षरूप्यकाणां धनराशिं प्रदास्यते। राष्ट्रीय युवा पुरस्काराय आवेदनं नवम्बरमासस्य प्रथमदिनांकतः पञ्चदशदिवसं यावत् गृह मंत्रालयस्य कॉमन अवार्ड पोर्टल इत्यनेन माध्यमेन आमंत्रिताः सन्ति।

**रेल विभाग**

रेल विभागस्य चिटिकाया: आरक्षणस्य नूतना: नियमा: अद्यारभ्य प्रवर्तते। विभागेन पूर्वारक्षणस्य समयसीमा विंशत्योत्तर एकशतदिवसात् षष्टीदिनं यावत् न्यूनीकृता। किन्तु वर्षस्यास्य एक अक्टूबर पर्यन्तं निर्मिता: सर्वा: आरक्षिता: चिटिका: अक्षुण्णा: एव भविष्यन्ति। रेलमन्त्रालयानुसारं अनेन नियमेन यात्रिण: सौविध्यं अनुभविष्यन्ति।

**टेनिस ओपन**

स्लोवाकिया देशे प्रचाल्यमाणे ब्रातिसलावा टेनिस ओपन प्रतियोगितायाः भारतस्य ऋत्विक चौधरी बोलोपल्ली, अर्जुन काढे चोभौ पुरूषयुगलवर्गस्य उपान्त्यचक्रे संप्राप्तौ। अद्य सायं एतौ ब्रिटेनस्य जुलियन कैश, कोलंबियायाः निकोलस बैरिन्टोज चोभौ सम्मुखीकरिष्यतः।

**क्रिकेट् इति**

भारत-न्यूजीलैण्ड-दलयोर्मध्ये तिसृणां क्रिकेटनिकषस्पर्धां श्रृंखलाया: तृतीया अन्तिमा च स्पर्धा अद्य मुम्बय्या: वानखेडे-क्रीडाङ्गणे प्रचलति। पूर्वमेव न्यूजीलैण्डदलेन द्वे-शून्यम् इत्यङ्कान्तरालेन स्पर्धा एषा विजितास्ति।

।।इति वार्ता:।।